कस्यापि निश्चयो नाभूदन्तरे कं हता इति ॥ ५५ ॥

स्तीरगता भेया अविच्छिन्नरयच्छलात् ।
मन्दाः सर्पयन्ते ते तच्छुचेयामयन्तदा ॥ ९१ ॥
ये राजवेश्म विविशुः सुभगाः सुवेशा-
स्त्यङ्कुशुङ्कुरधूलिकृतान्यकाराः ।
ते द्विजयोदशिविधा धृतजीर्णवस्त्रा
निष्कासिता नृपगृहात्स्फुतरक्तभासः ॥ ९२ ॥
इत्थं परितमे पर्वे माण्डुपद्मयकारणम् ।
वैशाखस्य चतुर्दश्यां सैदानां विप्लवोऽभवत् ॥ ९३ ॥
नूनं हसननाम्नां सहस्राणां तत्र वत्सरे ।
अन्तकः संनिविर्षभूपेनैते प्रलयं गताः ॥ ९४ ॥
सामान्यवेश्मनि वरं अभिरन्तु पुंसां
मा मास्तु राजनिलये बहुदुःखकर्त्री ।
ते शेरते तु समर्पस्य पर्टकमध्ये
नो मान्ति राजपुरतो विपुले सुदेशे ॥ ९५ ॥
अथाविस्तानमायाया शुद्धा पद्माद्यालात् ।
मदीपारगनाम्भुया द्राविदण्डनानिवरोधित. ॥ ९६ ॥
मातरतुषन्यानुगुणत माहे. कारमीरिक. समम् ।
अज्ञानटकुणयारने मत चतुर्भिर्गपिदा ॥ ९७ ॥
विहारप्रस्थान्तर येदा प्रासरनाहयादमा ।
तसापरसुटीपषमपिडता रिर्विर स्वयु ॥ ९८ ॥
पुरमाग्रायीदाप्यरने सैरा देर्वावसनिव ।
वाजिबमौरिसर्भुविष्ठा राज्यलक्ष्मी विसर्जिरे ॥ ९९ ॥
यथा वर्णादिकेवाचि माभूत्वनगता कश्चिन् ।
इयलेकपदरसाद्वाभरस्य वराभूर्पनः ॥ १०० ॥

तेषूत्तुङ्गतुरङ्गेषु सर्वतो घस्तुघार्गेषु ।
अकारि शास्त्रग्रहणं शिल्पिशाकटिकैरपि ॥ १०१ ॥
मन्दुपसुन्दरा येभ्या राज्ञोभूवन्महागुणाः ।
तानारुह्याधमाश्चेदस्तद्भृत्या नित्यदुर्लभान् ॥ १०२ ॥
ततो हस्सनराजानकाद्यैरन्यैश्च संयुताः ।
षाड्गुण्यं विदधुः सैदाः काश्मीरिकजिगीषवः ॥ १०३ ॥
ते मीयामत्तनाराचमुख्यानां यन्त्रणोज्झिताः ।
स्वसेवकानां विदधुरधिकारसमर्पणम् ॥ १०४ ॥
अत्रान्तरे पारगताठकुराद्या महाधियः ।
सैन्यानां संग्रहं चक्रुस्ते जालद्रगरान्तरे ॥ १०५ ॥
श्रुत्वेति साहसोदात्तं नगरे मद्रनिर्मितम् ।
आययुः सर्वराष्ट्रेभ्यो लोकास्ते शस्त्रधारिणः ॥ १०६ ॥
प्रवृत्ते च पुरक्षोभे पुरे ग्रामे च पत्तने ।
अत्युल्बणजनः सर्वो धावति स्म धृतायुधः ॥ १०७ ॥
शमालावाङ्गिनीयाद्याः क्रमराज्यगताश्च ये ।
स्थामार्थं क्षिप्तिकातीरे शिबिरं समकल्पयन् ॥ १०८ ॥
दरद्भिश्चक्रचाकाद्यैर्दरद्भिः सुभटैः समम् ।
वैडूर्यभट्टः स्थामस्थो युद्धसंनद्धतां दधौ ॥ १०९ ॥
नीलाश्वलोकं संगृह्य पम्मराजानकादयः ।
दुग्धाश्रमान्तिके सिन्धोः पारं स्थामार्थमासदन् ॥ ११० ॥
सर्वतो धान्यसंभारानानीयानीय नाविकैः ।
प्रवासचेतनं कोशाभावात्काश्मीरिका व्यधुः ॥ १११ ॥
क्वचिल्लुण्ठि क्वचिद्दाहं परदेश इवात्र ते ।
पारावारगताश्चक्रुर्नदीं तीर्त्वा पुरद्वये ॥ ११२ ॥

धनुर्धन्वधरैर्मुक्तैः प्रतितीरं पुरद्वये ।
पञ्च सप्त मृता युद्धे प्रत्यहं कटकद्वये ॥ ११३ ॥
मृताश्वोपान्तसामन्ताः क्षीणप्रेष्या गृहोज्झिताः ।
मामायदोषाः पानाद्य चक्रु दारिद्र्यपीडिताः ॥ ११४ ॥
चौराः कृतप्रमोषाश्च चिरबन्धनयन्त्रिताः ।
तत्प्रद्वाराधिपत्याच्च पिशुनाश्च व्यपूरयः ॥ ११५ ॥
कृताधिकारास्तत्कार्यन्यायप्रस्थापनक्षमाः ।
फले धान्ये च तुतुषुर्वैरोस्मिंस्तदुपद्रवे ॥ ११६ ॥
नौसेतुबन्धाभावाच्च सर्वा मडवराज्यतः ।
आनीय यामतीरस्था विदधुः स्वोपयोगिनीः ॥ ११७ ॥
देवाभिधः शाकुनिको नाविकाधिपतां भजन् ।
प्रतीर्य नौकायुद्धेन विदधे शुभटक्षयम् ॥ ११८ ॥
सदा डल्लसरस्तीरस्थितान्शाकुनिकानपान् ।
सपोतान्व्ययजन्योद्धुं तत्तचन्द्रपुरस्थितान् ॥ ११९ ॥
श्रीयाचकाख्यनामापि पुररक्षाधिकारभाक् ।
विचार्य चौरांस्तत्काले द्विशान्शूले न्यरोपयत् ॥ १२० ॥
आसमुद्रमठाद्गैननगरान्तं सडिण्डिमम् ।
तस्मिन्स्फुरति पौराणां न भीश्चौरकृताभवत् ॥ १२१ ॥
छिन्नेषु सेतुबन्धेषु तत्तच्छ्रीपुरकादिषु ।
पूर्दुर्गैरचनैवाभूद्दुर्गमा तद्विरोधिनाम् ॥ १२२ ॥
आस्कन्दं स्कन्दभवनादाद्धोपनृपाङ्गनम् ।
पञ्चहस्तमितां सैन्याः परिखां समकल्पयन् ॥ १२३ ॥
द्वारधानीसमीपेपि रुद्रराजानकान्तिके ।
तादृशीं परिखामन्यां चक्रुर्वैरिभयच्छिदे ॥ १२४ ।

अथ लोहरकोटस्थं श्रीमार्गेशमहाङ्गिरम् ।
उद्दालटकुमाराख्ये लेखमित्थं व्यसर्जयत् ॥ १३७ ॥
यस्मादभिया देशात्त्वद्गुरुर्नो गतो भयात् ।
स मर्द्दीर्घदिनोऽस्माभिर्युक्तस्तदा तद्यशसाहरः ॥ १३८ ॥
सोयामदस्मदाधिक्यतुर्वैरस्मद्विगोपुभिः ।
धैतस्नो दक्षिणो यासो मार्गोऽस्माभिः समाश्रितः ॥ १३९ ॥
जिगीषवो वयं सर्वे क्रान्तकश्मीरमण्डलाः ।
पुरमाक्रायदिशारन्ते सैदास्तिष्ठन्ति वेष्टिताः ॥ १४० ॥
तद्विलम्बविधिं त्यक्त्वा तूर्णमागम्यतां यतः ।
प्राप्ते त्वयि जयोऽस्माकं तव स्युः कीर्तिसंपदः ॥ १४१ ॥
राज्यभक्ताश्च दासाश्च यूयमेवात्र मण्डले ।
तदनागमनात्कीर्तिं मा कार्षीः स्वां कलङ्किताम् ॥ १४२ ॥
वर्षे रणाद्दाक्षिणात्ये पूर्वं मल्लकजःखयात् ।
राज्यरक्षां व्यधादत्र यथा मार्गेशमल्लदः ॥ १४३ ॥
तद्वत्प्राणैस्त्वया रक्ष्यं तूर्णमागत्य सांप्रतम् ।
अन्यथास्य शिशो राज्यं स्थापयन्ति न सैदजाः ॥ १४४ ॥
इति लेखं विचार्याशु स्वदेशोत्कण्ठिताशयः ।
तूर्णं पर्णोत्समार्गेण स मार्गपतिराययौ ॥ १४५ ॥
प्राप्ते तस्मिन्दिनैर्द्वित्रैः कुद्दर्शनपुरान्तरम् ।
चकम्पुः शिबिरे सैदाः प्रदीपा इव वायुना ॥ १४६ ॥
अथ संमन्त्र्य सैदास्ते भयात्संधातुमिच्छवः ।
इत्थं शिखशाहायाद्रौ लेखहस्तान्व्यसर्जयन् ॥ १४७ ॥
प्रधानपुरुषाः सन्तः कृतसैन्यवधाः कथम् ।
भवन्तो बत कुर्वन्ति कार्यं लोकविगर्हितम् ॥ १४८ ॥

अमात्या एव कुर्वन्तु राज्यकार्याणि पूर्ववत् ।
किंचित्प्रदयति नो देशो लोकाः शान्ति भजन्ति च ॥ १६१ ॥
यद्गतं गतमेवात्र मृता जीवन्ति नो पुनः ।
अन्योन्यशुद्धिर्भवत्स्य आतान्योन्यकृताद्भयात् ॥ १६२ ॥
इत्यादि युक्तमुक्तं तद्वाक्यं श्रुत्वा मदोद्धताः ।
सैदास्तद्युक्तिजनितक्रोधदग्धा इवाभवन् ॥ १६३ ॥
नृपः कोशश्च शास्त्रं च युद्धदक्षास्तथा भटाः ।
सर्वमित्यस्मदायत्तं किं कुर्वन्ति विरोधिनः ॥ १६४ ॥
इति दैवतयानोक्ता युद्धसंनद्धबुद्धयः ।
अभूवंस्ते कृतोद्योगाः कौरवाः पाण्डवेष्विव ॥ १६५ ॥
अथैकदा मैपकारजोनराजानकादयः ।
पुरे नौसेतुमुल्लीर्य सैदयुद्धार्थमाययुः ॥ १६६ ॥
उपायैः सर्वदा जेयाः समयो न रणस्य वः ।
इति मार्गपतेर्वाक्यं मागृहस्ते रणोद्यताः ॥ १६७ ॥
दावूदनामा मार्गेशपुत्रो धामाकरो द्रुतम् ।
प्रतीहारादिभिर्युक्तो नगरान्तरमासदत् ॥ १६८ ॥
समुद्रामठमार्गेण प्रविष्टा पूतनाथ सा ।
प्रापलोरविहारं तं कर्तुं सैदभटक्षयम् ॥ १६९ ॥
रणं सोत्यज्य डोम्बाधा येभ्ये लुब्धा महाभटाः ।
सर्वस्वहरणव्यग्रा बभूवुर्नगरान्तरे ॥ १७० ॥
डोम्बाधाः सुभटाख्यान्ये प्रत्तोन्योन्यमुदायुधाः ।
प्रसिद्धपौरवेदमभ्यो भाण्डागाराण्यलुण्टयन् ॥ १७१ ॥
भूमौ निखन्य यद्यत्नं पौरैर्गुप्तं गृहे धनम् ।
खित्वा प्रतिपदं तद्गृहीतं तत्तैरिवार्पितम् ॥ १७२ ॥

अवतीर्णं जलार्थं ताः पातालपुराङ्गनाः ।
ताः केशैर्भिर्निर्गताङ्गा स्वदस्वप्न विपेदिरे ॥ २०७ ॥
स सार्वाहिदवसे यत्र द्विजा धीराः धर्मार्थिनः ।
पिष्टा मुमूर्षवस्तत्र नीताः स्वमृदास्त्रति ॥ २०८ ॥
पर्हिदाक्षणपुरन्दीक्षितागावेयपद्धैः ।
यच्छित् हिमं महाभिर्हस्याभूत्पापदम् ॥ २०९ ॥
अभ्रंलिहाग्रप्रासादं स्वहस्तोद्धारनोदिताः ।
तद्बद्धे भक्ताः कृतं प्रयात्स्वमपि वैष्णवम् ॥ २१० ॥
राज्ञोर्द्विजसङ्घोदरहस्यपापादिपादिनः ।
मिथो गतापि यद्यस्मात् कि मायास्वं समाविदे ॥ २११ ॥
माता दोलागतोहत्याः कस्यापादादिदेशतः ।
शिशुः करस्पर्शेनाथ सर्वादिमद्रनृपाग्रजाः ॥ २१२ ॥
पञ्चगव्यदत्ताः धैर्यविसर्गप्रवस्त्वन्ययर्दिताः ।
यदा ह्लेच्छादरसपान्येपि ददृशुः गर्पत्तो द्विजाः ॥ २१३ ॥
वाहर्मीरिषाः स्वभेदेन सम्भास्या तथापदे ।
पयुरत्नापविपूरपमसानान्योन्यनिश्रयाः ॥ २१४ ॥
अत्रान्तरे भवस्तुत्वा साधं दीलोद्भूतस्फुटम् ।
उदीच्या दक्षिणा याता मध्यलग्नद्रुमहस्तका ॥ २१५ ॥
दृष्ट्वा तामद्भुतां सर्वे सैन्यवीरभयापि च ।
सेतुमानाद्भुतानिष्ठा बभूवुर्भयविह्वलाः ॥ २१६ ॥
अत्रान्तरे विद्वेषी. प्रगतो देवलिप्सया ।
ततारपानो ध्यस्तुत्यपन्थः पुष्पदं बलम् ॥ २१७ ॥
प्राप्ताः दाक्षणलस्थाने दुरुत्कारसे गुणुत्काराः ।
हता लोहजपलाद्यैः प्रालेयैः शलभा इव ॥ २१८ ॥

बलेरवधारयद्रागं बालो मनधरा तु‍या ।
व्यधात्तन्नाशनं नूनं सतांदैवाहितेच्छया ॥ २१९॥
आदमखानजस्तस्मै विद्रुह्य इति चोदितः ।
निवर्त्यं तं तुरुष्कः स स्वान्तिके समरक्षत ॥ २२० ॥
तदीयाश्वपदार्थांश्चमात्या तद्देशवासिभिः ।
अनन्यसुलभां प्राप्य श्रियं वैश्रवणायितम् ॥ २२१ ॥
अथ काश्मीरिकाः श्रुत्वा तद्वधं पापवादनम् ।
चक्रुर्वैनाममद्गौदा निष्कासयद्रताः श्रुतेः ॥ २२२ ॥
गजाग्रशिखा दुर्निग्रहतुरुष्ककटकान्तराम् ।
सहस्रश्रिन्यो तत्र दायानां निहितामयम् ॥ २२३ ॥
विशुद्धपार्श्विगर्भस्थन्नमयाः प्रासदलोद्धताः ।
काश्मीरिका मनं चक्रुः स्वार्थं हस्मानमः ॥ २२४ ॥
मध्ये मार्गेष्वासितिष्ठन्तु मार्गीदायाः पुरान्तरे ।
राजानकाद्या मद्राश्च स्थानस्था धान्यु दिग्जयम् ॥ २२५॥
पकनधीक्षिताः सर्वे मद्यम्नल्पकला पुन ।
ह्लिकमननिष्ठाकन परमन्य कृतनिभगा ॥ २२६ ॥
स्थानमार्गमादिरीतीक्षय स्वयद्रनाभृपधंध ।
माया भिन्नु प्रनीयांग अंतगतानका द्रुमम ॥ २२७ ॥
तामहस्थानश्रुतहन्ता पटावनतराम्यवधाम् ।
अर्थाजनतुर्याह हत्या भैदमतारभगाम् ॥ २२८ ॥
कार्मीरिका ततमात्याम्न प्रयाताः प्रतिवासराम् ।
बहुत्तनुटधवर्तोह वेवसारीहताविर्धा ॥ २२९ ॥
धन्यपुत्रपूर्व कामपनगम काश्मीरिकपत्तने ।
पूर्व राजपुत्रसरदीन सार्थो निगमयन्तः ॥ २३० ॥

छिन्नेषु सेतुबन्धेषु सैदैर्नौपुरकादिषु ।
नगरीं दुर्गमां दुर्गतुल्यां चक्रुर्द्विपक्षयात् ॥ २४३ ॥
अथ काश्मीरिकाः प्रोचुः सैदांस्तीरान्तिकस्थितान् ।
नौसेतुबन्धरज्जुर्यद्दत्तश्छिन्नो भयेन नः ॥ २४४ ॥
पुरमात्रावशिष्टत्वादुत्तिष्ठध्वं कियच्चिरम् ।
पर्याप्तं भुज्यते धान्यं किं कुरुध्वं पुनः परे ॥ २४५ ॥
श्रुत्वेति सैदास्तांस्तारमूचुरित्थं स्वसेवकैः ।
अन्नाभावाद्बुभुक्षार्ता न चलामो भयादितः ॥ २४६ ॥
का जुगुप्सा तुरुष्केषु सर्वमांसभुजो वयम् ।
यावत्पुंपशुगोमांसपर्याप्तिस्तावदास्यते ॥ २४७ ॥
पुरश्चेद्गम्यतेस्माभिः कः शक्तो रोद्धुं त्वदन्तरात् ।
श्रुत्वेत्युत्फुल्लकास्तीरे जह्रालमल्लिकादयः ॥ २४८ ॥
एकत्र मिलिताः सर्वे चक्रुः संमन्त्र्य निश्चयम् ।
सैन्यं स्थामविभागेन विभज्य पथिभिस्त्रिभिः ॥ २४९ ॥
उत्तीर्य यामः शीर्यन्ति सैदाः कटकमर्दनैः ।
अन्यथैकत्र संनद्धा दुर्जेयाः सैदपक्षगाः ॥ २५० ॥
एकतश्चेज्जिताः सर्वाञ्जेष्यामोऽल्पयत्नतः ।
अस्माकं प्रबले सर्वे न विलम्बोऽधुनोचितः ॥ २५१ ॥
श्रुत्वेति मद्रर्गपुत्रा जोनराजानकादयः ।
शृण्युयां नो जयं यन्ति युद्धगानरुतं दधुः ॥ २५२ ॥
अथैकं मतमाश्रित्य स्थामस्थाः सैन्यनायकाः ।
पुराणतक्षकस्थानातीरयां पर्यन्तमागमन् ॥ २५३ ॥
शीलभट्टादयो दृप्यपालिकान्यसदैशतः ।
नौभिर्नालां धृतोग्रगदाः संलग्नकाश्चभटाभ्ययुः ॥२५४ ॥

आसमुद्रामठात्पूर्वोधिष्ठानान्तं निरम्बराः ।
मार्गेष्विन्धनगण्डौघा इवासन्निहिताः शवाः ॥ २९० ॥

केचित्कुल्यान्तरे मग्ना मग्नाः केपि रणान्तरे ।
केचित्प्रमुषिता नग्ना भयोद्विग्ना दिशोचलन् ॥ २९१ ॥

तद्वीरावयवैः कृत्तैः पूरिता विपुलैर्मही ।
तद्ग्रामार्थे प्रवृत्तस्य मृत्योरिव महानसः ॥ २९२ ॥

ये सुन्दरा विपुलभोगपुरंदराभा-
श्चेर्ल्नैदेशविभवप्रथितप्रपञ्चाः ।
नग्नान्विलोक्य भुवि तान्धृतदुष्टगन्धा-
न्कस्यापि शाम्यति न देहभवोभिमानः ॥ २९३ ॥

वरं मरणमेवास्तु रणे स्वर्गसुखप्रदम् ।
न सहेयतनस्यामिवृत्तियाच्ञापदर्शनाः ॥ २९४ ॥

इत्युक्त्वा प्रविशन्युद्धे श्रीराभ्यस्थोप्यकातरः ।
हर्षीवर्मारः शस्त्रेण स श्लाघ्यमरणोभवत् ॥ २९५ ॥

अन्यान्प्रचलितान्दृष्ट्वापीक्षिताग्रासिवर्मिण ।
पलायनेच्छा नैवाभूद्युत्सायस्य मानस ॥ २९६ ॥

छिन्नाङ्गुलिकराङ्गुष्ठमात्रो ऽप्यमुनान्वित ।
अकरोत्क्षणमात्रं यः शस्त्रप्रचारणं रण ॥ २९७ ॥

स्थानस्थितः पुरस्थान्ते स राजानकहस्सनः ।
हतः सैन्यमार्गैर्मार्गेशकुल्यानदाम्भगः ॥ २९८ ॥

मल्लिकास्याङ्गुलिहस्तेन समस्य शिरं भटैः ।
नीत्वा स्वदर्शित हर्षाग्रे मार्गेशादिगमाग्रतः ॥ २९९ ॥

किमाकार्यनिकाभिर्न कुर्वन्त्यस्मान्परात्मिकाम ।
इत्युक्त्वाक्षै स मार्गेशः शापमुक्तिमकारयत् ॥ ३०० ॥

तद्भृत्यैर्लुण्ठितो देशो गोवधो यत्पुरे कृतः ।
जाने भृत्यापराधेन प्रातान्ते तादृशी दशा ॥ ३११ ॥
दौहित्रोऽपि महीभर्तुर्जातो वीरकुलादपि ।
तत्पापेनाभवत्तस्य चित्तं वीररसोज्झितम् ॥ ३१२ ॥
विप्रा राजसुताः सैदाः काश्मीरा अपरेऽपि ये ।
सहस्रसंख्याः समरे तद्दिने प्रलयं ययुः ॥ ३१३ ॥
निहतानीकसुभटसमूहान्तरलक्षितान् ।
भूमिदाहाय निष्कर्षुं नाभूत्कस्यापि पौरुषम् ॥ ३१४ ॥
ये सर्वचङ्गाः पीनाङ्गा भोगैर्मण्डलवर्धिताः ।
याता घर्मोत्थदुर्गन्धास्ते श्वचायसभोज्यताम् ॥ ३१५ ॥
रक्ताक्तकर्तरीशक्तिमुद्गरद्रुघनादिभिः ।
शाल्मलिद्रुमवत्पुष्पैर्बभुर्युद्धगता भटाः ॥ ३१६ ॥
स्मृत्वा मद्रविहाराग्निदाहं सैदकृतं मुधा ।
अलाभपुरदाहाय मार्गपोऽग्निमदापयत् ॥ ३१७ ॥
ज्वालाजालकरालोऽसावग्निर्यैदमोत्थदारुणः ।
अलाभदीननगरं दग्धारण्यमिवाकरोत् ॥ ३१८ ॥
श्रीमत्सैदहमादानपानगाढोद्दितानलः ।
राजप्रजापथारोत्थतत्कोपाग्निरिवाद्भुतम् ॥ ३१९ ॥
हतेषु भास्करायेषु पलाय्यान्येषु यात्स्वपि ।
विद्रुतेऽन्तरे लुण्ठि मद्रायाः श्वपचादयः ॥ ३२० ॥
भाग्नजन्मदरिद्रा ये ते महाश्चर्यमापयुः ।
सद्वैपात्रा दरिद्रस्यमुपि श्रीपत्रं सदा ॥ ३२१ ॥
केचिच्छ्मशानिर्निस्यन्तो यत्र कुत्रापि स्थिताः ।
भ्रान्ति ग्रामेष्वरीयार्धयंयुः कापालिका इव ॥ ३२२ ॥

विण्ढसंचयापूर्णगृहच्छिद्रपिधायिनाम् ।
अभूत्परस्परं युद्धं ग्रामीणास्थि शुनामिव ॥ ३२३ ॥
आदायैकेन यल्लीतं तस्मादन्येन तद्धृतम् ।
तस्मादप्यपरेणेत्थं मात्स्यो न्याय इवोत्थितः ॥ ३२४ ॥
द्विधा जयमयाहो यस्तद्वाहिन्योरभूत्पुरा ।
एकपार्श्वागमात्सोऽत्र दाण्युग्मूलमातनोत् ॥ ३२५ ॥
आरुह्याद्रिजयश्रियमायान्पौरान्निरयद्युग्मार्जितान् ।
युध्यन्तस्तन्नदाध्यधुर्दुर्भिक्षाग्रदुःखभागिनः ॥ ३२६ ॥
दारुणोप्यन्वयात्स्तत्तद्वस्तुनार्दितान्यपि ।
पौराणां समदृशन्त सदनानि मनांसि च ॥ ३२७ ॥
अगारान्तः कुलीनानां पुण्याः कन्याश्च योगिनः ।
पिता. केऽप्यधमाश्चर्दृष्टस्वभोगातृषिताः ॥ ३२८ ॥
व्यधायि यत्र निर्माणं कल्पान्तस्थिरतादाया ।
कोटिकोटिधने दत्त्वा दग्धे तन्नन्दमनादगात् ॥ ३२९ ॥
आसन्नन्तेऽपि येऽप्युग्रैरनर्घैरप्यलुण्ठयन् ।
दस्यवो दक्षिणे पारे क्षीणा इव जयोद्धताः ॥ ३३० ॥
न शीधुपरपर्णोऽप्यास्त येषामुग्रचयार्पणे ।
साहस्रपेण्याः कुम्भानामभ्यौपत्रयणाद्भृताः ॥ ३३१ ॥
केचिद्वन्धुवियोगार्ताः केचित्संचयपर्याश्रिताः ।
विण्ढरचवृत्ताश्रेया जितस्तद्भुपः परे ॥ ३३२ ॥
बहवो दुःखिताकोराः दातंवीर्याश्रयगुणो ।
तस्तद्र्णविपर्यस्य हार्थैः क्लैः स्वपरर्मान ॥ ३३३ ॥
उत्थायवैद्धैः साधं सहस्राङ्गिमर्दा गृहा ।
इत्थं पद्मिनमे वर्षे आषाढमर्मनिर्वाहिये ।
एकान्तविजयाशेषा तत्सहोदरयोऽभवत् ॥ ३३४ ॥

पूर्वमङ्कुरितः सैदयधात्पल्लवितः क्रमात् ।
परस्परं वैरतरुस्तद्दिने फलितोऽभवत् ॥ ३३५ ॥
पौराणां चीरवर्गः प्रतिदिनमहरत्संचयं वञ्चयित्वा
[illegible]
उच्छेदः शाटशाटायनिभफलतरुष्विन्धनार्थं दुरन्तः
सैदद्वैधारसमुत्थः प्रसरमुपपुरोपप्लवोऽभूत्समन्तात् ॥ [illegible]
अत्रान्तरे वधं श्रुत्वा सैदाः फादमीरिफोज्झिताः ।
आलिखानमुखास्तत्रशुद्धांसमानायरोषिणः ॥ ३३७ ॥
द्विनाभिहत्य नगरे निवृत्तः सैन्यभायतः ।
मीयामहम्मदः प्रापत्तावग्स्वशिबिरान्तरम् ॥ ३३८ ॥
मायरादीन्हतान्श्रुत्वा सैदा भीता अपि व्यधुः ।
द्विनाभिहत्य नगरे पुनर्युद्धाय निश्चयम् ॥ ३३९ ॥
पश्चात्प्रतीर्य मार्गेशो हन्याद्भक्तद्रूणांस्त्विह ।
इत्युक्त्वा ताजभट्टस्ताभिन्ये वासायिसूत्रताम् ॥ ३४० ॥
अस्मिन्नवसरे पाणदागतो युक्तिपूर्वकम् ।
सैदानादाय गयत्रः स्वालयं ताग्व्यमर्पयत् ॥ ३४१ ॥
कृत्वा बाल्ननृपं तं गैरावपदग्योज्झितम् ।
पौरानानन्दयामासुर्मन्त्रिणो महतां यथा ॥ ३४२ ॥
दुर्योधनैकजाएणाः कृतवाल्यवांगा
ये धर्मज्ञातिविश्वस्ताः कलिदत्तफलाः ।
धन्याधन्वूतिभूतनादृहनावपारा-
स्ते कौरव्या इव रणे न जयं स्मसन्ते ॥ ३४३ ॥
राजधान्यां समार्गेऽपि सर्वो पत्तपुरान्तरात् ।
[illegible] ॥ ३४४ ॥

यावत्सैदहमादाजगामगाहो मद्रान्तरे ।
पूर्वोक्तपुण्यसंभारैस्तद्वाकार इवोत्थितः ॥ ३४५ ॥
सर्वस्वमपहृत्यास्य सैदास्ते सकुटुम्बकाः ।
मण्डलादालिनामाद्या निरयास्यन्त मन्त्रिभिः ॥ ३४६ ॥
ऐकमत्येप्यमात्येषु काश्मीरेष्वधिशङ्किताः ।
ययुः परशुरामाद्याः स्वदेशं प्राप्तसत्क्रियाः ॥ ३४७ ॥
शिशौ दत्त्वा राज्यं वयमिह भजामः सुखमिति
व्यधुः स्वार्थं शिक्षा गलितमतयः सैदपतयः ।
हलेप्यंशे तेषु प्रसभमभजन्मन्त्रिपदवीं
परे तत्तज्जुष्टां विधिरिह पलायाय पुरतः ॥ ३४८ ॥
सीपादस्त्रसामग्रीं मामामादिप्रमेयजाम् ।
आदाल्लठक्कुरोगृह्णात्सुतो लहरादिकम् ॥ ३४९ ॥
गृहीत्वा वाङ्गिलं राष्ट्रं स्वयं मार्गेशमागतः ।
मसूयादिप्रमेयांश्चाभजत्पद्मामाञ्जहाङ्गिरः ॥ ३५० ॥
कामाथमादिपर्येषु स्वाम्यभूत्सैफडामरः ।
अन्यां च ग्रामसामग्रीं सैदरेषु यथोचिताम् ॥ ३५१ ॥
परिहासपुराधीशो जोनराजानकोऽभवत् ।
सैन्याधिकारनिर्दैन्यस्यात्तत्रपोज्झितपञ्चणः ॥ ३५२ ॥
इमादिमश्च मार्गेशो द्वारपालाधिकारभाक् ।
चक्रे सैदादिभृत्यानां रक्षामक्षामपौरुषः ॥ ३५३ ॥
यात्तोधिकारसामग्रीं भूमेर्द्रव्यावलीमिव ।
महाभूता इयामाल्याः संभूय व्यदधुर्नवाम् ॥ ३५४ ॥
एतौ मार्गपतेः पक्षाट्ठक्कुरौ डामरोपमः ।
राजानकोपो दीनाख्ये सर्वप्रथ इवापुतत् ॥ ३५५ ॥

आत्मैव निष्क्रियः साक्षिमात्रं बालनृपोऽभवत् ।
सर्वं प्रकृतिनिष्पन्नं राज्यतन्त्रमभूत्तदा ॥ ३५६ ॥
विभजन्तो भुवं सर्वां यथेच्छं स्वेषु केवलम् ।
अलेखयन्नृपं पत्रे स्वाङ्काकाराक्षरत्रयीम् ॥ ३५७ ॥
कष्टप्रदाः प्रजानिष्ठा दुष्टभृत्यविचेष्टिताः ।
यथेष्टं समचेष्टन्त हृष्टास्तेरिष्टचेष्टया ॥ ३५८ ॥
स्वपक्षरक्षणे दक्षाः परपक्षेष्टखण्डनाः ।
तार्किका इव ते तस्थुर्वितण्डा वादशिक्षिताः ॥ ३५९
मण्डलं तापयन्ति स्म सर्वे तीक्ष्णकरा न के ।
कल्पान्तकाले भुवने द्वादशार्का इवोदिताः ॥ ३६० ॥
आक्रन्दितोल्कादाहैश्च भूरिभूकम्पसंपदा ।
वेपमानो जनो जज्ञे प्रत्यावृत्तमुपद्रवम् ॥ ३६१ ॥
द्विशो नृपे व्यधुः पीडां विशां चैते नियोगिनः ।
आमया इव देहानां वार्धके शक्तिवर्जिते ॥ ३६२ ॥
नृपतेर्यदि मन्त्रगणसहाया
रचयन्ति प्रबला मिथो विरोधम् ।
कुपिता इव धातवः शरीरं
क्षपयन्ति प्रसभं महीं च राज्यम् ॥ ३६३ ॥
ये सर्वकण्टकान्वेषिणः परेषां छिद्रकारिणः ।
करमाणामिवैतेषां मे तेऽभ्यागमनतिप्रियाः ॥ ३६४ ॥
पैशुनोपायनाद्वैरं नयद्भिः प्रतिवासरम् ।
धार्मिकैः कृतसंधानैर्वैरं प्रादिमनीयत ॥ ३६५ ॥
उक्तं यथैव केनापि स्वयुक्त्या परिकल्पितम् ।
तेषां तद्रूपपैशुन्यं हृष्टं काव्यमिवाभवत् ॥ ३६६ ॥

इत्थं मन्त्रिद्वन्द्वादर्शोपेताद्यान्योन्यविनिघ्नताः ।
तन्मूल्यपैशुनाभ्यासैर्मालिन्यमभजन्त ते ॥ ३६७ ॥
अथ मार्गपतेरश्वपद्वीं प्राक्समागताम् ।
नागहस्तापदे रम्यां चक्रवाका इवेन्दवीम् ॥ ३६८ ॥
इदास्माभिर्हृताः सैषा यद्दीप्त्या विद्रुमोप्ययम् ।
नृपस्यास्य सभाभ्येष्ट्यः स्थापितः कुरुते मदम् ॥ ३६९ ॥
इत्यादि गर्वयंस्तन्मूल्यवर्गान्मार्गपतिस्स्वनः ।
तादृश्यं राजकार्येषु विरक्तः सोभजद्रुषा ॥ ३७० ॥
यद्वामग्राननयनोत्पाटनेन निजं वपुः ।
विद्यामनाहितं पार्श्वे जोनराजानकोऽनयत् ॥ ३७१ ॥
दग्धाधिपत्यानौचित्यनिमहानुमदभ्रमैः ।
ग्रहाणामिव तेषां स क्रूरो राहुरिवाभवत् ॥ ३७२ ॥
पुन्द्रालकादिदेशस्थग्राम्याणामनियन्त्रणः ।
लोत्रभूम्यपहारेण महेशोऽपि सोऽभवत् ॥ ३७३ ॥
विदद्रैधान्तरे लुब्धैः स्वैरेव मुषिताः प्रजाः ।
तत्पदार्धपदं पूर्णो कोष्ठागारावली स्वधात् ॥ ३७४ ॥
यत्कष्टेनार्जितं लोकैर्वेलात्कारहृतं धृतम् ।
तं प्रजाद्वेषमिति यत्परस्वं वेत्ति लुब्धधीः ॥ ३७५ ॥
संपूर्य पार्टिमीः स्वर्यास्मदीया इनजोवनं ।
ओषींमिश्विष्णुमोग्नौ न बभूव कदाचन ॥ ३७६ ॥
द्वैतार्थिरर्थकारोपे ग्रामे वा नगरान्तरे ।
नारायणद्विषु कधिक्षस्थिता तेन पाटिहनम् ॥ ३७७ ॥
यदि धर्मेषिता कधिशपणां दौमरणे ।
स तद्दूषते राजतरङ्गस्य कदी हतिम् ॥ ३७८ ॥

स्वप्रमेयेषु वास्तव्याद्वैश्याश्चिरपराधिनः ।
अन्येपि पीडयामासू रोगा इव नियोगिनः ॥ ३७९ ॥

राजा शिशुर्गतवया बहवः सहाया
यत्रातिमत्सरभृताश्च मिथः स्वतन्त्राः ।
राज्याङ्गभङ्गमसमं नृपतेर्दिशन्त-
स्तत्राचिरात्समुदयन्ति न के ह्यनर्थाः ॥ ३८० ॥

अत्रान्तरे वाह्यदेशे यात्रार्थं यौ विसर्जितौ ।
पद्मराजानकाष्ठकुराह्वदश्चापतुः पुरम् ॥ ३८१ ॥
तद्दर्शनापदेशेन श्रुत्वा किमपि मन्त्रिणाम् ।
नगरे नागमद्दूतैर्मार्गशः शङ्कितो भृशम् ॥ ३८२ ॥
ससैफडामरेणाशु गत्वा स चकितो गृहे ।
वैदेशिकभटाह्वानात्साशङ्कः सोनयन्निशाम् ॥ ३८३ ॥
शङ्कयेषु सदनाप्तेषु प्राप्तस्तन्मतमास्थितः ।
अह्लादष्ठकुरो जोनराजानकमथावधीत् ॥ ३८४ ॥
शस्त्रव्रणमुखोद्गच्छद्रक्तसंसिक्तमण्डपम् ।
तद्गृहे तं शवं दृष्ट्वा न को रोमाञ्चितोभवत् ॥ ३८५ ॥
दत्तकन्यमयं जन्यमवधीद्गृहमागतम् ।
दिव्यं कृत्वापि साश्वस्तं धिग्भोगाभ्यासवासनाम् ॥ ३८६
मिथोसहिष्णवो भेदान्मन्त्रिणः प्रभविष्णवः ।
चिन्तयन्त्यचिरेणैवं द्रोहिणेत्यपि केचन ॥ ३८७ ॥
केप्यूचुः स यथा सैद्रानवधीन्मद्रपैः सह ।
पर्यर्णकेन तत्पापात्तद्व्यापादितोरिभिः ॥ ३८८ ॥
भृत्या पृथैव रक्ष्यन्ते पोषिता ये सहस्रशः ।
नैकोपि तेष्यस्तस्यान्ते प्राणत्राणक्षमोभयत् ॥ ३८९ ॥

अर्जितं यद्यथैवाशु तत्तथैव हृतं परैः ।
न तिष्ठन्ति चिरं गेहेष्वन्यायोपार्जिताः श्रियः ॥ ३९० ॥
पापं पुण्यं खलं दाक्ष्यं परं स्वं दूषणं स्तुतिम् ।
नो वेत्ति राजपुरुषः कदाचिद्विधुरे विधौ ॥ ३९१ ॥
वैदेशिकभटैः किं नस्त्याज्या सैन्याधिकारिता ।
इत्युक्तोऽपि स पुत्रेण नाग्रहीद्भाग्यवर्जितः ॥ ३९२ ॥
विपरीता मतिः पुत्रे विश्वासः परकीयके ।
जायते गतभाग्यानां विनाशे प्रत्युपस्थिते ॥ ३९३ ॥
वैदेशिकभटारम्भेन यत्नजातीनियान्यहम् ।
अश्वत्थाम्नश्छद्मिणो वीरान्मेने भीरूनपगानिव ॥ ३९४ ॥
समैपकडामरं वीरवरस्तच्छौर्यशङ्कितः ।
भीतः समाधिपच्छत्रं पौरपृष्ठेने निश्चयः ॥ ३९५ ॥
जल्लालठक्कुरस्तापद्राजधान्यङ्कने स्थितः ।
यद्धोन्तः स्वैष्ठांरपालैर्गतिः क विधुरे विधौ ॥ ३९६ ॥
भास्वानपि प्रतिदिनं मृदुतां प्रयाभिस-
  स्तां तां विभर्ति गगनान्तरगोऽप्यवस्थाम् ।
निस्थाकुलस्य मनुजस्य बलप्रभावे
  को निश्चयो भवति तत्र विचित्रवृत्ती ॥ ३९७ ॥
मसूरडामरप्रारम्भे छिन्नसंतुबन्धनाः ।
प्राग्वद्भेजाल्लदूर्गेऽईे विद्युः सैन्यसंग्रहम् ॥ ३९८ ॥
दृष्टागर्वाविनिष्टे ययुः सम्पुराप्यमा ।
ठक्कुराः सालिपाधानेष्वास्तता. स्वयमागताः ॥ ३९९ ॥
कारागारान्तरं प्रापुः कस्य ययुः संपदः स्थिराः ।
जौराघनामा मल्लूस्यः स्वादरी नगरान्तराम् ।
ठक्कुरादाद्युरगाङ्करया राजपुरीं ययौ ॥ ४०० ॥

इत्थं तत्सैद्वधतो जोनराजवधोधिकः ।
पाददाहादिवासह्यो गलरोगो व्यथावहः ॥ ४०१ ॥
यावन्नरस्त्यजति कार्यकृदेकचिन्तां
चिन्तान्तरं सृजति तावदमुष्य धाता ।
याते क्षशिम्नि शशिनः किल पूर्णिमासी
संजायते स्तुतिहरो ग्रहणप्रचारः ॥ ४०२ ॥
निष्प्रतिद्वन्द्वि नैश्चिन्त्यं मार्गेशो यावदाप सः ।
तावच्छुश्राव संप्राप्तं पुत्रमादमखानजम् ॥ ४०३ ॥
स यथाभ्यन्तरं प्राप्तो यथा राज्यं ग्रहीतवान् ।
बाल्यात्प्रभृति वृत्तान्तं तत्खानस्य ब्रवीम्यहम् ॥ ४०४ ॥
पितुः श्रीजैननृपतेः प्रभये निर्गतो बहिः ।
आदमखानो विभ्राणः प्रपेदे मद्रमण्डलम् ॥ ४०५ ॥
भावीश्वरांशतैश्वर्यप्राप्तिसूचकपर्वणि ।
शिवरात्र्यन्तरे तस्य तत्रस्थस्य सुतोजनि ॥ ४०६ ॥
जनकेस्य दिवं याते तुरुष्कसमरान्तरे ।
मातामहगृहे चन्द्रो ववृधेम्बुनिधाविव ॥ ४०७ ॥
काले तात्तारखानेन रक्षितः स गतः स्वयम् ।
जालंधरमहीपीठे निनाय कतिचित्समाः ॥ ४०८ ॥
जहांगिरोस्य मार्गेशः सैद्भीत्या गतो बहिः ।
सोपधि व्यग्रजल्लेखं धर्तुं पैतामहं पदम् ॥ ४०९ ॥
तत्तारखानप्रभये ततः खानमिमं पुनः ।
सुतो हस्सनखानोस्य कंचित्कालमपालयत् ॥ ४१० ॥
तुरुष्कान्वञ्चयित्वाथ विहितोत्साहसाहसः ।
खानोमितपरीवारः प्रापद्गृहणमण्डलम् ॥ ४११ ॥

इतः काश्मीरिका दूता मार्गेशेन विसर्जिताः ।
शृङ्गारसीहेनानीतास्तावद्राजपुरीं प्रति ॥ ४१२ ॥
ततो राजपुरीनाथो मार्गेशाद्भयनिर्जितः ।
पताहद्यानमानिन्ये स्वानिर्घः स्वाश्रयेच्छया ॥ ४१३ ॥
जोनराजानकयथात्काश्मीरेभ्यो विनिर्गतैः ।
डामरैर्धरजानठाकुरदोलुमादिभिः ॥ ४१४ ॥
तत्रस्थैः शिश्रिये ग्लानस्तम्भुर्गैरिव ।
प्रयां निन्ये यथा पूर्वं शुष्केन्दयास्मजांभयन् ॥ ४१५ ॥
शीनसंबन्धयद्दोपि मार्गरक्षाधिकारभाक् ।
मसूदनायकः सोपि ग्लानपक्षे समाश्रयत् ॥ ४१६ ॥
दीनो ग्राम्यजनो दुष्यदुनायकतार्दितः ।
तदागमनवार्तां तां श्रुत्वे प्रार्थमियाविदन् ॥ ४१७ ॥
तापरार्धर्जिकान्यायप्रेष्यधिककरोषतः ।
धीरा चिरा दर्शिताथ शुशुभुः ग्लानवार्तया ॥ ४१८ ॥
ग्रामे वा नगरे वापि त्यक्त्वा गृहेषु दुष्यकम् ।
यद्यागो राजविभवे न कः प्राप तदन्तिकम् ॥ ४१९ ॥
तांस्तान्देशाद्विनिर्यातान्यानो गृहस्थगृहिमान् ।
पेत्स्यत्पुष्पनतिष्ठ' स राजः प्रत्यभियोगिताम् ॥ ४२० ॥
पौत्रः श्रीजैननृप ायोग्योयमिति सर्वतः ।
स्वस्तान्याम्नरथैराज्ञैश्वसमैपानिधिपञ्जकः ॥ ४२१ ॥
तडागांश्चपलान्पुराश्रीर्ग्याश्चमार्हिपताः ।
ताम्रपुत्रपि सम मत्स्या इव तडागगाः ॥ ४२२ ॥
न मम महती सैवैषोरिर्जितोभ्यदयो महा-
  गिरितिरतिबैः स्का भिन्नाः पंरध्वरसंयताः ।

स परतुरगोस्त्वस्य: कोऽपि न चाधिकृतो दिन-
स्तमिव घुणास्तास्ताश्चिन्तास्तुदन्ति चिरं न किम् ॥ ४२३ ॥
तुष्टो जहाङ्गिरस्तावन्मन्त्राल्या प्रेषितोपधिः ।
तावमन्मतगं शाल्या मन्त्रिन्नः समपद्यत ॥ ४२४ ॥
अद्दिनोन्मूलनोद्भूतदेशोकाधिमयातिनः ।
सुलेच्छुः प्रत्युत प्राप दुःखमुद्भूतविग्रहः ॥ ४२५ ॥
प्रवर्धमानया नित्यं स्वानागमनयानया ।
पेपमानोभवल्लोको पात्ययेव घनावलिः ॥ ४२६ ॥
चान्तिकाद्यनुराः खानमन्त्रिणोथ जिगीषवः ।
इत्थं लेखाङ्कितं दूतं व्यसृजन्मार्गपं प्रति ॥ ४२७ ॥
भो भो मार्गपते गर्वसर्वस्वर्पितविक्रमः ।
काश्मीरान्तः सुपर्वेव भवांश्चर्चितमद्यशाः ॥ ४२८ ॥
सोयं खानस्त्वयानीतो लेखैस्तौरुष्कदेशतः ।
उपेक्ष्यते कुलस्वामी कथं मार्गपतेधुना ॥ ४२९ ॥
स्वयं कृतं कथं कार्यं पश्चात्तापाय जायते ।
शिशौ राज्यं परित्याज्य भुज्यते मण्डलं परैः ॥ ४३० ॥
व्यवहारोचितः शुद्धः सोयं किं तिष्ठते बहिः ।
अथ वा पितृभागं चेत्प्रयच्छस्यस्य मण्डलात् ॥ ४३१ ॥
बहिरेवास्त्वयं राजाप्ययमस्त्वन्तरे स्थितः ।
अथ किं बहुनोक्तेन मान्यो यदि न तेस्त्ययम् ॥ ४३२ ॥
रणोभयबलवधात्पापं ते परिणंस्यति ।
श्रुत्वेति लेखं मार्गेशः खानदूतोपदर्शितम् ॥ ४३३ ॥
प्रत्युत्तरमयं पत्रं तस्मै दत्त्वाब्रवीदिति ।
भो भो मण्डलगोप्तारो भोक्तारो नृपसंपदाम् ॥ ४३४ ॥

एकतो नृपतेः सेना काष्ठावालस्य चान्यतः ।
दंष्ट्राद्वयी यमस्येव लक्षिता सर्वभक्षिका ॥ ४४७ ॥
मात्सैरयितुमारब्धानविद्रुतः सोऽधिकोऽभवत् ।
पादत्राहारिवासहो गलरोगो व्यथावहः ॥ ४४८ ॥
तस्करास्कागतपथिको मल्लश्रिहतायनः ।
शरागक स्यानीशो दैवाः कर्त्ते दशामगात् ॥ ४४९ ॥
जग्मुर्दक्षिणपारस्थग्रामेषोऽन्तर्दिगाश्रिताः ।
सुवीरता योधने सर्वं त्यक्त्वा रणवराजीभयात् ॥ ४५० ॥
केऽपि पार्थयन्ते यद्धं ध्रुवमभिशिभेव रता ।
समापरम्भहांप्याजा प्रविष्टा कटकद्वयी ॥ ४५१ ॥
राज्ञीभवं समालोक्य प्रगुणं कारणभुवा ।
एकदा शीरपायाक्षे क्षणकान्दं शिविरे ययुः ॥ ४५२ ॥
प्रज्ञागन्धवस्थानदात्राश्रयाणाभिवर्तिनाः ।
सर्वं पद्मपमात्मनाभिश्चभुः शिविरान्तरान् ॥ ४५३ ॥
[illegible] केऽपि [illegible] ।
[illegible] ॥ [illegible] ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ४५५ ॥
[illegible] ।
[illegible] ॥ ४५६ ॥
[illegible] ।
[illegible] ॥ ४५७ ॥

तुरुष्कदेशादपकृष्य ग्लानः प्राप्तो निरर्गलः।
स मार्गरोदस्तत्पश्चात्तेनापि प्रयत्नहृतः॥ ४५८॥
अथ मद्रिदिलावस्थाने मुषः ग्लानो जयोन्मदः।
स्वसैन्यसंमर्द कुर्वन्निर्गतुः शिबिरं व्यधात्॥ ४५९॥
विकरालाम्बराश्लिष्टा करालपिरयावली।
मुमुर्षुनिश्वासरालम्भान्यारम्भान्तस्य दारिणः॥ ४६०॥
अत्रान्तरे मार्गपतिर्गृहीत्वा बालभूपतिम्।
सन्नद्धाय बलोत्पुत्रौ निर्ययौ नगरान्तरात्॥ ४६१॥
प्राकारदेवकदनाऽपरस्तस्यरनयस्तुयिलुण्ठनाः।
पुराङ्गदग्धौ भीताः पौरा ग्रामेषु न्यविशन्॥ ४६२॥
निष्प्रत्युपस्तुभापा या मुषितेव पराङ्गना।
अभयद्राजरहिता नगरी न गरीयसी॥ ४६३॥
वैदेशिकटकाटोपघोषोत्करस्टङ्कटः।
मुषितोद्धारभूपालं पादपाच्छिबिरं व्यधात्॥ ४६४॥
संस्थाप्य तत्र भूपालं त्रिधा कृत्वा स्ववाहिनीम्।
कल्याणपुरतो धृत्वा ग्लानं योद्धुं विनिर्ययौ॥ ४६५॥
ग्रामग्रामान्तर्ग्रामान्ते ग्रमासस्योधिकार्थी :।
तस्थौ खानान्तिकं प्राप्य स खानमरणान्तरे॥ ४६६॥
क्रमराज्यस्फुरत्प्राज्यपञ्चधारादिदुःसहम्।
वैदूर्यभट्टः पाश्चात्त्यां जमाह शिरिपद्धतीम्॥ ४६७॥
सपरोजस्नीहारगकराजसुतादयः।
चतुरङ्गोपमां लीलां क्षणे चक्रुः पुरो गताः॥ ४६८॥
अधैवतः स्वकादमारवैदेशिकबलान्विताः।
मसुदनायकसुता योद्धुं व्यूहात्समाययुः॥ ४६९॥

फलकासिस्फुरत्पक्षा नदन्तोन्तिकमागताः ।
चेरुः पङ्क्त्या भटास्तत्र हंसा इव नभोन्तरे ॥ ४७० ॥
यावत्प्रवृत्तो योद्धुं तांस्तावद्वीक्ष्याग्रमागतान् ।
अह्लादठक्कुरव्यूहो निरीहः समपद्यत ॥ ४७१ ॥
चेलाह्निकाभुजः केपि गर्जन्तो जलदा इव ।
स्फुरच्छस्त्रतडिज्ज्वालाः सोत्फाला निर्ययुर्मृधे ॥ ४७२ ॥
विषमा पङ्कसंकीर्णा जाड्यदुर्मार्गदूषिता ।
तेषामापततां साध्या धासनेव निजाजिभूः ॥ ४७३ ॥
वैदेशिकभटान्दृष्ट्वा नटत्खेटकपीटकान् ।
चटका इव जग्मुस्ते विदूरं पाटवोज्झिताः ॥ ४७४ ॥
न संस्तम्भयितुं सेनामशकत्तां पलायिनीम् ।
अह्लादठक्कुरोदीर्णां सेतुभङ्गां नदीमिव ॥ ४७५ ॥
अहमहमिकायातजातघातव्रणार्दिताः ।
प्राणत्यागेन ते केपि चक्रुर्वेतननिष्कृतिम् ॥ ४७६ ॥
स्रवच्छोणितसिक्ताङ्गाः शालिक्षेत्रगताः शयाः ।
यागोपहारपशुतां ययुः कार्त्तिकभूमिषु ॥ ४७७ ॥
सेना शानस्य धारयेव सा नैर्ऋतदिगागता ।
तत्तल्लोकक्षयं चक्रे वेगभग्नमहद्रुमा ॥ ४७८ ॥
केपि काश्मीरिकास्तत्र वैदेशिकभटानले ।
शालभ्यायतलीलाते द्रुद्रुवुः धीफलं ययुः ॥ ४७९ ॥
किं नामोद्दीरणैस्तेषां दृष्ट्वा व्यूहं समागतम् ।
निर्यैर्भिरिव पातुं स्वं भीत्या यैर्धिः पलायितम् ॥ ४८० ॥
प्रमेयभाजां गुण्या ये दृष्टा गजगभाग्नारे ।
अदृष्टपूर्वे संग्रामे तेऽप्यदर्शितपादागम्. ॥ ४८१ ॥

धीरपूरया स्वजन्मराजान्वयपदे श्लाघ्यतामगात्।
तस्य विषमुगरस्यतामाणा अनुचरा रणे।
दिवं विपाम्भोभोगार्थं चभूस्ते पुरःसराः ॥ ४८२ ॥
इत्यादिहार्निवृत्राप्य तं स्यानस्य महामयाः।
नियुक्ता मार्गपत्यभे र्व्यापद्मानया समायपुः ॥ ४८३ ॥
मसूदखानः पेरुधेय यद्रन्मो विजयोद्यताः।
धीरा हुस्सनमीरादा हाता मार्गपतेर्भटैः ॥ ४८४ ॥
पश्चादस्तस्य संवधिभूत्यास्ते मौलजादयः।
सर्पादिभट्टाद्यान्वे च हता मार्गपतेः पुरः ॥ ४८५ ॥
विभुक्तोभूस्थितरकाले यः स सांमुख्यमाययौ।
धालम्भृग्रमायेण कश्मीरस्कटयं विधिः ॥ ४८६ ॥
मार्गेशस्याय या स्तुर्य धैर्य तस्यात्र संयुगे।
संनद्धः सवलस्तस्यौ जयस्तम्भ इवाचलः ॥ ४८७ ॥
पदैकमात्रं पश्चाद्वेदगमिष्यथ तरस्यलात्।
काश्मीरकटकस्यास्य मायाशिष्येत किंचन ॥ ४८८ ॥
भिन्नप्रकृतिसंधानकौशले श्रीजशाङ्किरे।
भिषजीय तदा दृष्टं भैषज्यं सांनिपातके ॥ ४८९ ॥
प्रागल्भ्यमप्रतिहतं प्रतिमानमोज-
स्त्वस्त्रप्रयोगचतुरत्वमसंभ्रमश्च।
एतानि यस्य समयेप्यतिसंकटे स्यु-
स्तुर्यैव तं प्रति रमेति रणे जयश्रीः ॥ ४९० ॥
खानोस्मत्करमासांत्र मिथ्योद्दोप्यात्र संयुगे।
रणाग्रचलितान्दूरं युक्तया सर्वानुपानयत् ॥ ४९१ ॥
मार्गेशमभुसांनिध्ये तद्रणोपवनान्तरं।
ते धीरभ्रमरश्रेण्यः स्फुरत्पक्षस्वरांद्वृताः ॥ ४९२ ॥

अथ मानस्य शिबिरे गक्काद्या जयदुर्मदाः ।
नीतावशिष्टां सामग्रीं हत्वा भूरीनलुण्ठयन् ॥ ४९३ ॥
इब्राहिममार्गेशः सभृत्यः समरागमः ।
मसूदनायकमुखान्धिसुखांस्तत्रैर्व्यधात् ॥ ४९४ ॥
अन्ये शृङ्गारसीहाद्या दृष्ट्वा तत्सैन्यमद्भुतम् ।
भेडावनपथाच्चूर्णं विद्रुताः स्वां भुवं ययुः ॥ ४९५ ॥
सर्वं राजपुरीसैन्यं सदैन्यं वेष्टितं भटैः ।
दत्त्वाभयं ररक्षाज्ञो गक्को गणपतिर्यथा ॥ ४९६ ॥
त्यक्ता संनाहसामग्री केप्येते विद्रुता द्रुतम् ।
मुषिताः खशदौर्लम्बैः पृष्टमग्नाः प्रशान्तयः ॥ ४९७ ॥
वृक्षानपि वने जघ्नुररयोनु लगन्त्यमी ।
वैदेशिकैर्हतं यत्तद्ग्रामेषु जनपीडया ॥ ४९८ ॥
काश्मीरिकेभ्यो मुषिता निक्षेपमिव ते ददुः ।
शीतज्वरार्दिताः केचित्केचिच्छ्रान्ता बुभुक्षया ।
वैदेशिकाश्च काश्मीराः शतसंख्याः क्षयं ययुः ॥ ४९९ ॥
संरूढं कमपि निपातयत्यकाण्डे
पाताहं नयति च कंचन प्ररूढिम् ।
संकल्पाविषयविचित्रकाकतालीं-
वार्यीघस्तरुमिव पूरुषं विधाता ॥ ५०० ॥
यादृक्सुवासनः खानस्तादृशस्तस्य चेद्भटाः ।
भवेयुः किं न जायेत किं तु धर्मानुगो जयः ॥ ५०१ ॥
इत्थं फतहखानेस्मिन्प्राप्ते कश्मीरमण्डलम् ।
एकषष्टितमे वर्षे पुरुद्वच्छ्रावणान्तरे ॥ ५०२ ॥
कटकद्वयसंयोगे कल्याणपुरसंनिधौ ।
अमर्त्यानां च वाहानां तत्तल्लोकक्षयोभवत् ॥ ५०३ ॥

मित्रशैलान्तिरेयोमे मीनाये दानिशीययोः ।
भीमाद्य तत्सार्थे देतु देवौ देवविदो विदुः ॥ ५०४ ॥
धार्मिकनृपते राज्ये षड्दर्शनरताः प्रजाः ।
एताः स्वधर्मनिरता निरातङ्का निर्वृतयः ॥ ५०५ ॥
तस्मिन्नवसर्गे गते याति महाचारेत्र मण्डले ।
प्रजापचाराल्लोकानां ह्रासोभूदिति मे मतम् ॥ ५०६ ॥
तथा हि पण्डिताः केचित्स्वाचारं हिन्दुकोचितम् ।
त्यक्त्वा पुनन्तरे यवनदृष्ट्या गोमांसभक्षणम् ॥ ५०७ ॥
येनैव पितरो याता येन याताः पितामहाः ।
तद्दीनेत्र नापुत्रास्त्वपन्ले मांसुलप्रियाः ॥ ५०८ ॥
प्रायश्च निश्चितार्थानि पुराणोक्तानि कानिचित् ।
विस्मृतानि दुराचारत्वार्थं न स्युर्दुराचराः ॥ ५०९ ॥
मण्डलेऽस्मिन्दुराचारचातुर्वर्ण्यविराजिते ।
प्रसङ्गपतिताचारविपर्यासादितोऽलिखम् ॥ ५१० ॥
राजाक्रान्तः पर्दक्षिण्या धार्त्तयेति विसृञ्जितः ।
मार्गेशस्ताजमहादीन्भृत्या स्वशिविरं ययौ ॥ ५११ ॥
पथार्थेस्त्वगिन्धरस नदीस्तान्यल्पवर्जितान् ।
न किंचिदुपदिष्येत सानस्य चलतः पथि ॥ ५१२ ॥
मार्गानभिज्ञो मार्गेज्ञः सर्वेष्वुभयपेतनाः ।
दायादुःस्थिति लोके काङ्क्ष्मः स्वार्थलिप्सया ॥ ५१३ ॥
श्रैर्येहनद्रणाद्रन्तु मार्गेशो चाप्यदीदरन् ।
सनृपं सैन्यमुत्थाप्य ततो जिष्णुर्महाङ्गिरः ।
जमालामहणास्थानं ययौ स विजयोर्जितः ॥ ५१४ ॥
किमेते मिलिताः स्थानमिति तेन विसर्जिताः ।
ददाद राजभट्टः स मामान्माहात्म्यमादगान् ॥ ५१५ ॥

तस्मादन्यगृहीतस्तान्भूभुजालाद्भुतं भयः ।
समकालोद्भवाद्दीनाद्विद्विषामभूत् नृपो ॥ ५१६ ॥
इत्थं गजाधोरोऽपि कारणीर्शिर्जनगते ।
शादतुरुष्कादिकं तत्रदृष्टमत्रैव मण्डले ॥ ५१७ ॥
भविष्यतान्जनतासम्प्राप्तिकाले नृपाणनान् ।
मधेन आगतम्या सत्र कोल्हाव्दारतं ददौ ॥ ५१८ ॥
तत्रत्यास्मशूलं कुर्यां कश्चं धेनूः पञ्चशतानि ।
स्त्रीष्वप्पागकुलाधतुरगाकल्पगुणाग त्रिशः ॥ ५१९ ॥
सर्वस्वाहरणं मद्यस्थलमस्मात्संदिग्धकम् ।
युष्मास्वपि तथा भूपास्तथैव विरोधिभिः ॥ ५२० ॥
तत्पापफलमेतेषु त्रिषु तस्मात्प्रशमनम् ।
कृताददादराज्याती दृष्टं लोकैर्विगर्हितम् ॥ ५२१ ॥
उत्पिञ्जोत्पादनाद्देशो गृष्णदिन्यादि दूषणम् ।
प्रजापापादर्मधिनुर्मीदाः स स्वयतेन ॥ ५२२ ॥
स नृपो नगरं प्राप्तो विधाय विजयोत्सवम् ।
उद्यायचान्यानपक्षगतान्सर्वानदण्डयत् ॥ ५२३ ॥
एकं स्वातान्वयं ज्ञात्वा शिष्टं तस्य कुटुम्बकम् ।
अयाचत न को देहे दुष्टरोग इवोत्थ्यः ॥ ५२४ ॥
कदाचित्सुप्रीतो जनयति सुखं सार्वजनिकं
कदाचिद्वक्रेच्छः सृजति जनतामीतिचकिताम् ।
फलं नीचे चोर्ध्वं भविषु परिवृत्त्या विदधतो
ग्रहस्येवाकाशे गतिरिह विचित्रा यत विधेः ॥ ५२५ ॥
कंचित्कालं दरग्रस्तः स्वामत्राणविवर्जितः ।
यायावर्किंचित्करतामग्रह इवाम्बुदः ॥ ५२६ ॥

अत्रान्तरे स्थितः खानः सर्भेरपगलान्तरे ।
अविघ्नपरशुगर्दैरुपप्रेष्टो मापकोऽर्जितः ॥ ५२७ ॥
मानरुद्रपर्णसमस्य कश्मीराभिमुखस्ततः ।
मापयौ स पुनः खानः सत्राण उद्भटैर्भटैः ॥ ५२८ ॥
तस्मिन्सूरपुरं प्राप्ते स नृपोऽथ जहाङ्गिरः ।
निर्ययौ नगरात्पूर्णं संपूर्णः सैन्यसंपदा ॥ ५२९ ॥
प्राग्यात्स गुप्तिकारस्थाने निषण्णः शिबिरान्तरात् ।
गद्दरजसुतं राज्ञी सोत्पूर्णाद्विद्रुतं द्रुतम् ॥ ५३० ॥
आरोहणक्षणे तस्य तुरङ्गस्यासमर्ह्यत् ।
क्षणं स दाकुनस्तोऽपि नातिष्ठदभिमुखः क्रुधा ॥ ५३१ ॥
गृहीतभूमिपस्तोऽपि यत्रैव द्रोहितामगात् ।
कोऽन्यस्तिष्ठति तत्रेति भरतः प्रत्यागतोऽभयत् ॥ ५३२ ॥
तुलधे निर्गतो भूयो मार्गेशः शिबिरान्तरात् ।
उपायैर्भिन्नतयोऽचकं खानस्य बलभेदनम् ॥ ५३३ ॥
अत्रान्तरे यत्पुरजीरकाद्या महामदाः ।
प्रविश्य नगरं रात्रौ बन्धनस्थानमोचयन् ॥ ५३४ ॥
ते सर्वे बन्धनान्मृत्युमारादिव विनिर्गताः ।
सैफडामरमुख्यास्ते संप्रापुर्विजयेश्वरम् ॥ ५३५ ॥
स सैफडामरः पूर्वं बन्धने स्वप्रमैक्षत ।
केनाप्यन्यपदद्वन्द्वं छिन्नं दात्रेण तत्क्षितौ ॥ ५३६ ॥
वीरस्य बन्धनं तस्य स्फूर्जत्पक्षस्य रक्षणम् ।
सोऽष्मणः पतितं मेने पक्षैर्बलायगूहनम् ॥ ५३७ ॥
तथापि रक्षणं पक्षैरिव बलायगूहनम् ।
जयापीडपुराद्दुर्गोद्बन्धने नगरे कथम् ॥ ५३८ ॥

इत्यपायोऽप्युपायस्य जातो मार्गपतेर्यतः ।
इब्राहिमः स मार्गेशस्तावत्पथ्याद्विनिर्गतः ।
दांदनायकमुख्यानां बहूनां कदनं व्यधात् ॥ ५३९ ॥
ठक्कुरपद्मदजीयकमठीहापन्यपादयः ।
इत्थं तत्साहसं चक्रुर्लङ्घितक्रोशपट्टयः ॥ ५४० ॥
विपदि समनुभूय कोपि कष्टं
भवति पदं नृपसंपदां नितान्तम् ।
कनकमनलपाततापमात्वा
शिरसि विभाति नृपस्य मौलिरूपम् ॥ ५४१ ॥
कारापञ्जरनिर्मुक्तः पक्षीयाक्षतपक्षतिः ।
पुनर्जातमिवात्मानममन्यत स डामरः ॥ ५४२ ॥
पूर्वं जयपुरे दुर्गे योभूद्रुद्रःसहोदरः ।
कारागाराकारमुल्लङ्घ्य रज्जुनैकोपि निर्गतः ॥ ५४३ ॥
रुद्रः सुप्तः पुनर्बद्धो नगरे बन्धनालये ।
निश्चिन्तितं बधस्तत्र द्वित्रैस्त्रिदिनान्तरे ॥ ५४४ ॥
एवं कष्टागमो मुक्तः प्राप्तः स्थानान्तिकं क्रमात् ।
प्रधानपुरुषाख्याति प्रापत्प्रकृतिमध्यगः ।
स सैफडामरस्तत्र यथासंख्यमतस्थितः ॥ ५४५ ॥
क्रमो राघवपक्षितो यदि गृहार्थं वागमिष्यद्वनं
सुग्रीवः स च वालिना हतपरां नैवापदिष्यद्रुपा ।
क.. प्राप्य रिपुर्विग्रहस्य समरे जेतामविष्यन्कथं
महोंर्ग सुखदुःखयोः प्रतनुते धातैव मूल्यं द्वयोः ॥ ५४६ ॥
..विप्लुतो देशास्तानां वीराभिलम्पटः ।
..रङ्गः सर्वनामाप्परष्पुगः ॥ ५४७ ॥

एवमन्योन्यसापेक्षौ नाभविष्यत्त्वयं यदि ।
प्रविश्य देशे राज्यश्रीः कथमस्य भविष्यति ॥ ५४८ ॥

राजा विभाति यदुपोऽन्यसमाश्रयेण
   वीरा भजन्ति च तदाश्रयणेन शोभाम् ।
अन्योन्यसंगतिरसाङ्कुरमाङ्गिरेवं
   बालाङ्गनाधनकभूषणवद्विभाति ॥ ५४९ ॥

तेन भावेन सा स्नानसभा तत्र व्यराजत ।
गुणाश्लेषाङ्गनाङ्ग भावकेन शुभात्मना ॥ ५५० ॥

अत्रान्तरे मार्गपतिर्व्यथितस्तत्समागमात् ।
संधिगुः सोमपादादमुपास्थाने व्यसर्जयत् ॥ ५५१ ॥

पद्मराजानको रिगडामरः कंदापो बुधः ।
राजानमेत्य संप्रार्थ्य निन्ये राजपुरीपतिम् ॥ ५५२ ॥

तावद्दायदपुत्रगुप्तादाभ्यस्य मार्गपः ।
शृङ्गारसीदं तं भेदमनयद्द्रविणार्पणैः ॥ ५५३ ॥

नीत्या मार्गपतेः पुत्रं संधिगुः स पलद्वये ।
न्यपारयद्रणक्षोभं यावद्राजपुरीपतिः ॥ ५५४ ॥

तावन्मार्गेशपुत्रं तं दोषमन्यैर्विनिश्चितम् ।
नामन्यत स यत्नेन स्वाराज्ञा मन्त्रिणोऽभयन् ॥ ५५५ ॥

यावत्प्रजासु सनृपासु विधिर्विरुद्धो
   दायादुदुःस्थितिरुपायशतैर्न याति ।
देहे दुराधिनिहते भिषजां प्रयुक्त्या
   योगाः कथ प्रविगलन्ति कृताधिकाराः ॥ ५५६ ॥

स्थानान्तरस्थैराक्षिप्ते भिन्ने राजपुरीपतौ ।
अकस्मादुदभूत्क्षोभः सर्वसैन्यभयावहः ॥ ५५७ ॥

[illegible] नगरीं पशुः ।
[illegible] ॥ ५५८ ॥
केचित्[illegible]निधी ।
[illegible] ॥ ५५९ ॥
एवं [illegible] ।
वपी [illegible] ॥ ५६० ॥
अथ मार्गपतिः श्रुत्वा तद्वृत्तान्तमनुद्रुतः ।
[illegible] स प्रापत्कूरपुरान्तरम् ॥ ५६१ ॥
तत्र कूरगुणाच्छ्रुत्वा [illegible]मुपस्थम् ।
[illegible] त्रैगुण्यमादधे ॥ ५६२ ॥
निवृत्य स ततो दासः प्रातः सुस्यपुरान्तरम् ।
बबन्ध नीरजो स्थाने युक्तया यत्साधु तद्यथा ॥ ५६३ ॥
स हि तद्दिवसे प्राप्स्यन्पुष्पस्थीनगरं विटैः ।
किं नु तत्काङ्क्षितं क्रूरं न सिद्धं पौरपुण्यतः ॥ ५६४ ॥
सोपेक्ष्य मार्गपं तत्र ढौकितं श्रमराज्यतः ।
पदार्थराशौ दस्याग्नि तद्रूपा भस्मसाद्व्यधात् ॥ ५६५ ॥
अन्यायतः प्रतिदिनं समुपार्ज्य वित्तं
यद्दानभोगरहितं निहितं गुहान्तः ।
तत्संप्रयाति कृपणेषु कृतानुतापं
भूपालसादनलसादरिदस्युसाद्य ॥ ५६६ ॥
ततस्तत्सहितः प्राप्तो नगरं स जहाङ्गिरः ।
जयेन तावन्मात्रेण नगरे स व्यजृम्भत ॥ ५६७ ॥
सैदाभिष्काशिवान्देशात्स्यपुत्रवधकानपि ।
लेखैरानाययामास सोपयोग्यतया स तान् ॥ ५६८ ॥

तदन्तरे जम्भयाटे घसन्यानी बलोर्जितः ।
मृगानिव हरिस्तत्र विदधे दुर्दशान्खशान् ॥ ५६९ ॥
सप्तविंशतिसंख्यान्स काश्मीरविषयान्यथा ।
तावतीः सिन्धुपीस्तत्र व्यधाद्दुःस्थः पराक्रमैः ॥ ५७० ॥
सार्धं मल्हानहंसैस्तत्कटकः सुभटोत्कटः ।
मद्रमण्डलमुल्लुण्ट्य तुरुष्कांश्चकितान्व्यधात् ॥ ५७१ ॥
स मद्रमण्डलं जित्वा कृत्वा राजपुरीपतेः ।
जिष्णुर्धैभ्रे पुनः प्राप सद्युतो नायकालयम् ॥ ५७२ ॥
गृहं देवतपस्मार्तं स्नानं तं मानयन्गुणैः ।
मसूदनायकोमुष्मिन्नाभयद्भक्तिखण्डितः ॥ ५७३ ॥
सागरस्त्यजति चेच्चिरां स्थितिं
पश्चिमोदयमुपैति चेद्रविः ।
क्षत्रियः शरणमागतेऽर्थिनि
प्रायशश्चलति न स्वधर्मतः ॥ ५७४ ॥
स सैन्यसंग्रहं कृत्वा छपिल्लुकटकान्वितः ।
तदयौ ग्यानो गिरिशृङ्गे वैरिभङ्गविधित्सया ॥ ५७५ ॥
रोगैरिव भटैर्ध्वस्तसमस्तगृहयन्तुभिः ।
वास्तव्यानां स्थितिर्दुःस्था गेहे देहे यथाभवत् ॥ ५७६ ॥
अत्रान्तरे बन्धनान्तर्गतं पृष्ठपाटितम् ।
भीतो व्यापादयामास ऑयर्षः नगरेऽध्यपः ॥ ५७७ ॥
तद्दुःस्था राजलोकश्च सर्वं यय विरागभाक् ।
आश्वासपातकरणं दुर्दिनमुपरोभयत् ॥ ५७८ ॥
ज्येष्ठे मासि धुलानिशो मार्गेशः कर्णनिष्ठितः ।
अतिष्ठन्स नृपो भट्टशिलापृष्ठेतिनिष्ठुरः ॥ ५७९ ॥

द्रङ्गमार्गनिरोधेन सर्वोप्युभयचेतनः ।
जनो बलद्वयं गन्तुं निराशः समपद्यत ॥ ५८० ॥
विशां निर्लवणं भोज्यमभवत्तमत्र मण्डले ।
मार्गोदाम्यग्रजनं नाम श्रुतं हास्यावहं न कैः ॥ ५८१ ॥
सार्धे पले सैन्धवस्य मयोभूनगरान्तरे ।
दीनारपञ्चविंशत्या दुरापं नागरैरपि ॥ ५८२ ॥
प्राप्तदितमवर्षेपि कश्मीरागमनोत्सुकम् ।
श्रानं श्रुत्वा मार्गपतिर्नीतिकौटिल्यमादधे ॥ ५८३ ॥
दौहित्रं हाजिखानस्य खानमिस्कन्दराभिधम् ।
कम्पनाधिपतिं कृत्वा स्वामार्धं स व्यसर्जयत् ॥ ५८४ ॥
मसूदनायकीयं च राष्ट्रं दत्त्वा स्वगुप्तये ।
यः [illegible] चापि [illegible] प्रत्यमुच्यत ॥ ५८५ ॥
सार्धं देशाद्गुणेनाथ [illegible] तनुतां गते ।
स्वसैन्यसहितः श्रानो राजपुर्याः समाययौ ॥ ५८६ ॥
मार्गं श्रानं समाकर्ण्य स [illegible] ।
मार्गे शूरपुरे [illegible] मार्गेशः सनृपो ययौ ॥ ५८७ ॥
मर्वेशागतः श्रानस्य सूर्पणगव्यभितः ।
[illegible] देशीभूपकर्मानिनः ॥ ५८८ ॥
[illegible] पुष्पवन्नम[illegible] ।
[illegible] श्रानः [illegible] ॥ ५८९ ॥
[illegible] ।
[illegible] ॥ ५९० ॥
[illegible] ।
शाहः [illegible] ॥ ५९१ ॥

अथ मार्गपतेः स्वर्णमयींमङ्गलमालिकाम् ।
सचामरां डामरेशो जयश्रियमिवामदत् ॥ ६०४ ॥
उपेक्षितं तं तत्रस्थैर्निजैराश्वस्तमानसम् ।
ररक्ष केवलं प्रीतो आत्यश्वः समराच्चलन् ॥ ६०५ ॥
विहितारिप्रसराः सचिवाः सममेकपार्श्वगताः ।
यत्र सुराद्मप्रचिता मज्जति नौकेव राजश्रीः ॥ ६०६ ॥
वैदेशिकभटैर्द्रोहे विहिते समरागमे ।
तावत्ते फत्यवाडाद्या निन्युः खानं यथागतम् ॥ ६०७ ॥
खानो राजभटैर्बद्धो रणे मिथ्येति वार्तया ।
स सैफडामरो युद्धात्त्यस्तधैर्यो न्यवर्तत ॥ ६०८ ॥
तत्तद्वराश्वसामग्रीं गृह्णञ्शूरपुराध्वना ।
समरोड्डामरः सैफडामरः खानमासदत् ॥ ६०९ ॥
इत्थं तृतीयधारं स प्रविष्टो मण्डलान्तरात् ।
वधं कृत्वा विनिर्गत्य खानः पर्णोत्समागतः ॥ ६१० ॥
अधर्मबहलः कालः सर्वे द्रोहपरायणाः ।
राजा शिशुतरश्चायं स्वतन्त्रं मन्त्रिमण्डलम् ॥ ६११ ॥
अविधेया निजाश्चामी खानपक्षप्रतीक्षिणः ।
पौरा निरनुरागाश्च निष्कोशं नृपमन्दिरम् ॥ ६१२ ॥
सत्ता नाम न वृद्धस्य सर्वसामर्थ्यवर्जिता ।
इति संचिन्तयन्दाखाघातजातव्यथाकुलः ।
मासौ द्वौ गमयामास मार्गेशोऽपि स्ववेश्मनि ॥ ६१३ ॥
दृष्ट्वा महार्घमणिमौक्तिकविद्रुमाद्या-
 न्रत्नाकरं श्रयतु कोऽपि सुलाभलोभात् ।
यस्मान्महाभयकरान्मकरांस्तदीया-
 न्वीर्येण वारयितुमुज्झितभीः समर्थः ॥ ६१४ ॥

अत्रान्तरे पुनः स्वानध्यटिकास्मारपर्यन्तात् ।
इतो यातैर्भटैः सार्धं लब्धत्राणः समापर्या ॥ ६१५ ॥
तस्मिन्नप्यन्तरे ग्रामे शुद्दितैरपि पर्वतः ।
तद्दहःपतितं दध्रे सुपारं सुमिताम्बरम् ॥ ६१६ ॥
ग्रामान्प्रज्वलितान्दृष्ट्वा सद्यार्तांश्चाकुलस्ततः ।
मार्गेशो पाङ्गिलं त्यक्त्वा त्वरितो योद्धुमभ्यगात् ॥ ६१७ ॥
तावग्निमतपर्यायारौ मधुरूपान्तराद्गतः ।
प्राप दामोदरोड्डारभूमिं डामरसंयुतः ॥ ६१८ ॥
स नृपो मार्गपः पश्चात्तत्रागुरियोर्जितः ।
सैन्यं न्यवेदयत्तत्र यातदैवतवर्तिनिर्धा ॥ ६१९ ॥
सम्भूदो जातयुद्धेद्धो निशान्ते सैपडामरः ।
यमभङ्ग मार्गपालीयं दामोदर इवोत्थितः ॥ ६२० ॥
चित्रं दैदरदाढस्य यत्र सिद्धं त्रिधागमैः ।
अहो हीनबलस्यापि सिद्धमस्य विधेर्वशात् ॥ ६२१ ॥
किमन्यदल्पसैन्योऽपि स्वानः पदमीरपुङ्गवान् ।
हतविद्रुतविध्वस्तनृपान्स्वद इव व्यधात् ॥ ६२२ ॥
प्राप्यावसरोऽनियमादाहूय मार्गपः सैपडामरान् ।
अभ्ययाँ वीक्ष्य लाटस्यं प्रवेदं नगरान्तरम् ॥ ६२३ ॥
छिन्नेषु सेतुबन्धेषु भावसंदर्भपक्षता ।
पारापारगताः पौरा द्विराज्यायुक्तां स्पृहः ॥ ६२४ ॥
वैरोऽप्रतिदासाया मात्रा मदयराजनः ।
नुपपारे परित्यज्य स्वामपारे समाश्रयत् ॥ ६२५ ॥
यवभेदजर्जरं ज्ञात्वा सैन्यं द्विधा विशीर्णवत् ।
पैद्यावकल्पभयेन विचार्यमदायुगः ॥ ६२६ ॥

एकदा सर्वसैन्येदं कृत्वा मीयामहम्मदः ।
नसराजानकयुतो द्रोहं स्वामिनि तद्व्यधात् ॥ ६२७ ॥
यथा चित्तं तथा कायो यस्य स्यात्साहसक्षमः ।
तस्यात्मनिरपेक्षस्य कर्तव्यं किं न सिध्यति ॥ ६२८ ॥
भोगिनेयं नृपपदेप्युपेक्ष्य स्वार्थलुब्धधीः ।
द्रोग्धाभूद्यस्स तेनाभूत्सर्वनाशस्य कारणम् ॥ ६२९ ॥
नष्टसैन्यः सदैन्योथ मार्गेशः शरणं भयात् ।
ज्यह्लालठक्कुरं प्रायात्पूर्वाश्रमस्थितं हितम् ॥ ६३० ॥
यथैव स विरुद्धानामकरोच्छसनादिकम् ।
तादृशीं स दशां प्रापद्धिक्चला राजसंपदः ॥ ६३१ ॥
सप्तग्रहानुगुणधारितसप्तवार-
वर्णांशुकोपचितवेशविशेषभूषः ।
यह्लामभूप इव योभवदष्टभोगः
प्राप्तो दशामितरवत्स धिगस्तु लक्ष्मीम् ॥ ६३२ ॥
क नृपः क मदीयं तत्सर्वस्वं क परिच्छदः ।
नास्मरत्तद्दिने किंचित्प्राप्तो मुनिगुहान्तरम् ॥ ६३३ ॥
राजदारापहारोत्थपापभारादिवार्दितः ।
तद्भ्राता नाशकद्गन्तुं नावं स्त्रीसहितोविशत् ॥ ६३४ ॥
अन्ये सैन्याः सदैन्या गिरिविलविगलद्वासरा धूसराभाः
स्तंतिष्ठद्दिष्टरिष्टेद्गतघनविलसद्वृष्टिनिर्नष्टचित्ताः ।
क्लिष्टैर्दुष्टैर्गरिष्ठैः परिहृतवसनाः पृष्ठलग्नैर्निकृष्टाः
कारागारान्तराले पशव इव बलात्ते निरुद्धा विरुद्धाः॥६३५॥
गर्जन्तो मुमुषुः परे जनपदान्दुष्टाः खशा दस्यव-
स्तन्नीत्या परिहृत्य सर्वमचलव्रभ्रा नरा वा स्त्रियः ।

[illegible]
[illegible] ॥ १३६ ॥
[illegible] ।
[illegible] ॥ १३७ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १३८ ॥
[illegible] ।
[illegible] ॥ १३९ ॥
[illegible] ।
[illegible] ॥ १४० ॥
[illegible] ।
[illegible] ॥ १४१ ॥
[illegible] ।
[illegible] ॥ १४२ ॥
[illegible] ।
[illegible] ॥ १४३ ॥
[illegible] ।
[illegible] ॥ १४४ ॥
[illegible] ।
[illegible] ॥ १४५ ॥
[illegible] ।
[illegible] ॥ १४६ ॥

काश्मीरिका यथा लुण्टिं बहिर्यात्रागता व्यधुः ।
तथा वैदेशिकाश्चकुः काले किं किं न दृश्यते ॥ ६४७ ॥

प्रतिपदभ्रमणैः सपरिश्रमा
मधुकरी तनुते मधुगोकुलम् ।
निहितधूमतया विनिवार्य तां
तमुपलभ्य परः सुखमश्नुते ॥ ६४८ ॥

कष्टैः षण्मासपर्यन्तं महद्भिःसंचितं गृहे ।
अयत्नमपरैर्भुक्तं सर्वं तत्पानसंश्रितैः ॥ ६४९ ॥

रक्ताक्तवृणपूगान्तः क्षिप्तं कैरपि यद्धनम् ।
न नीतमशुचिस्थानसूतिकास्तरणभ्रमात् ॥ ६५० ॥

ससुन्ननिम्नकुम्भाम्भःपक्षिपुष्करिणीकृतैः ।
रक्षितं कैरपि द्रव्य नीतं ताडितदर्शनात् ॥ ६५१ ॥

सत्यं ब्रवीमि धनिकाः शृणुतास्मदुक्तं
यत्संचितं वसु गृहे परवञ्चनाद्यैः ।
तद्भोगदानसफलं कुरुताविलम्बं
नो चेद्वृथा स्मरत राज्यविपर्ययेस्मिन् ॥ ६५२ ॥

भग्नभाण्डकरण्डालीः प्रसार्य परितो गृहे ।
मुषिताः स्म इति व्याजात्खशाः कैरपि वञ्चिताः ॥ ६५३ ॥

जलान्तरशवागाराञ्शून्यानापूर्य वस्तुभिः ।
ररक्षुर्नागराः केपि शून्यीकृतगृहा धनम् ॥ ६५४ ॥

तैर्निवर्तितगर्तान्तःक्षिप्तैः पौरधनैर्घनैः ।
तस्मिन्काले प्रतिपदं सत्यार्थाभूद्वसुंधरा ॥ ६५५ ॥

मार्गरोधायतैः सर्वैः क्षेपणीयाश्मवर्षिभिः ।
राजानवाटकीयैस्तैस्तत्काले साहसं कृतम् ॥ ६५६ ॥

कर्मस्थाननिधानसर्पसदृशप्रोन्सारणाडिण्डिमो
छिद्रप्राप्तजनसैन्यकाम्बुजघटाद्वैयन्तकालोदयः ।
भूपद्माम्बुगोलकस्थसरघासंघातधूमोद्गमः
सोभूद्राज्यविपर्ययो नयसमोद्यानद्रुमालीमघुः ॥ ६५७ ॥
किं स्वाचारविपर्ययात्किमु धनस्यान्यायतोपार्जना-
त्किं वा द्रोहितया सतां किमथ वा सद्वर्णसांकर्यतः ।
निःसामर्थ्यतया यथा शिशुविभोर्द्वैधेन वा मन्त्रिणां
राज्ये सुसरलभूपतेरिव बभूवायं प्रजोपद्रवः ॥ ६५८ ॥
येनादौ सैदवैरे रणरसिकतया मोचिता बन्धनस्थाः
सिद्धादेशाधिकारो व्यधित जितरिपुः स्फूर्जितं च प्रयातः ।
प्राज्यं राज्यं व्यधायः फतिहनरपतेर्नाशयित्वारिचक्रं
जीयाच्चूडामरेन्द्रो वरसचिवपतिः सैफमल्लेक एकः ॥ ६५९॥

इति श्रीजैनराजतरङ्गिण्यां पण्डितश्रीवरविरचितायां
फतिहशाहराज्यप्राप्तिर्नाम चतुर्थस्तरङ्गः
समाप्तेयं श्रीवरराजतरङ्गिणी ॥

अथ

प्राज्यभट्टकृता

चतुर्थी राजतरङ्गिणी ।

नमश्चराचराकारधारिणे चन्द्रमौलये ।
शिवाय स्वच्छस्वच्छन्दपरमात्मस्वरूपिणे ॥ १ ॥

विलोक्य मिथः शिवयोः स्वरूपं
सर्पाधिराजो मिलितोऽतिभक्त्या ।
गौर्या भुजावर्तनकङ्कणेन
यत्रायताङ्गो गिरिजाशिवार्धः ॥ २ ॥

विरतं मोहान्धतमो यदनुग्रहरोचिषा शुकस्यापि ।
वन्दे तं गुरुतरणिं सुदर्शनाश्रयहृत्सरोजदीप्तिकरम् ॥ ३ ॥

धन्यं तर्कवितर्ककौशलमतेर्यावत्प्रमाणान्वितं
यत्कान्त्या नृपवीथिवस्तुरचना देदीप्यते सर्वतः ।
श्लोकैः सत्पदशोभनैरविरलानुप्रासयुक्तैः शुभै-
र्नानार्थानुगतैर्मितैः सुकविना लालित्यभावान्वितैः ॥ ४ ॥

श्रीकल्हणद्विजश्लोकश्रीमद्राजतरङ्गिणीम् ।
आलोक्योपमिताश्यां स्वं वपुः कर्तुमखण्डितम् ॥ ५ ॥

श्रीजोनराजविबुधश्रीवराभ्यां मनोरमम् ।
कृतं द्वापष्ठिवर्षान्तं ग्रन्थं राजावलिद्वयम् ॥ ६ ॥
गङ्गाभगवतीतीर्थस्नाने धन्यः सुभूषितः ।
कविः श्रीप्राज्यभट्टाख्यः समग्रगुणभूषितः ॥ ७ ॥
राजावलिपताकां स्वां राज्ये फतिहभूपतेः ।
एकोननवतिं यावद्वर्षाश्चक्रे ततः परम् ॥ ८ ॥
अथ देशादिदोषेण दुष्टलुब्धकर्मातितः ।
नाग्रहीद्राजवृत्तान्तदीपालं मानसे कविः ॥ ९ ॥
तदाप्रभृति तद्वृत्तवर्णनं क्रियते मया ।
बुधचाश्रयात्मजेनात्र शुकाख्येनात्मचापलात् ॥ १० ॥
पूर्वेषां राजसंमान्यं निशम्य पृथुसंपदाम् ।
तद्भारशान्तये वाहं न कुर्वे कवितावाञ्छया ॥ ११ ॥
क्व पूर्वकविवक्तृत्वं क्वेदं मन्दधियो मम ।
वर्णमात्रेण रीत्यंशः स्वर्णखण्डायते कथम् ॥ १२ ॥
राजोदन्तमरं सन्तः श्रुत्वा योजनपूर्वकम् ।
अनुगृह्णन्तु मद्वाक्यसुधावृष्टिनिपर्हणे. ॥ १३ ॥
कश्मीरेषु महाराजजैनशाहकुलाङ्कुर ।
फताहशाहभूपालः प्रशासप्रभवन्महीम् ॥ १४ ॥
तस्मिञ्शासति तच्छोर्णी प्रजाः सर्वसुखावहाः ।
आसन्स्वधर्मनिरता दयादाक्षिण्यभूषिताः ॥ १५ ॥
श्रीघृतमद्यव्यसनेष्वसक्तः सचिवाग्रणीः ।
मुसराजानकश्चन्द्रान्वयोभूत्तस्य भूपतेः ॥ १६ ॥
आसु पंपलपर्तोर्जिनश्रियामन्ययायप्रभयोस्य मन्त्रिपद ।
धार्मिकोप्यपतिर्विग्रहीमकः सन्मतिः शुभमतिः पर्णमयद्॥१७॥

विभेद्य होसराजानं प्रतीहारादिचक्रिणः ।
अवधूय स्वजनकं यौनसंबन्धयन्त्रितम् ॥ ३० ॥
श्रीजैनोल्लावदीनस्य पुण्यराशिरिवोच्छ्रितः ।
मज्जितः श्रीचितस्तान्तश्चिरकालमभूत्तु यः ॥ ३१ ॥
राजानमूसचन्द्रेण प्लावितो निर्मलैर्धनैः ।
श्रीजैनकदलः सेतुः पारावारप्रतारणे ॥ ३२ ॥
मलाख्यमठमल्लेकपुरान्तरसमाश्रयैः ।
प्लोषितो वेश्मभिः साकं रात्रौ वैरिजिगीषया ॥ ३३ ॥
दग्धारण्यनिभे जाते नगरे कदले तथा ।
नावशिष्टं विटैर्लुण्ट्या स्नानवासो जनस्य च ॥ ३४ ॥
स संवृत्तः क्षीणकलो मूसचन्द्रस्तदूष्मणा ।
स्वसैन्यसंग्रहं कृत्वा निविष्टो जालद्रागडे ॥ ३५ ॥
शतैकीयोवसत्कोपि ब्राह्मणो ब्रह्मवर्चसा ।
युक्तो येनाभवत्तस्य राजानस्यारिनिग्रहः ॥ ३६ ॥
प्रतापाग्नेर्नरेशस्य पुरस्य दहनार्चिषः ।
राजानमूसचन्द्रेण स्ववपुः श्रीफलायितम् ॥ ३७ ॥
राज्ञा दत्ते पहिर्गन्तुं धर्मद्वारे द्विजैः पथि ।
विप्रशापाप्ययमानुर्मूसचन्द्रमथागिलत् ॥ ३८ ॥
